# Jayatat Mangale Dhanye

# जयतात् मङ्गले धन्ये

## Document Information

Text title : Jayatat Mangale Dhanye

File name : jayatAtmangaledhanye.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# जयतात् मङ्गले धन्ये

संस्कृतस्य प्रसाराय
संस्कृतेर्वर्धनाय च ।
समुत्पन्ना नवा वाणी
सर्वचित्तापहारिणी ॥ १॥

तमसो मा प्रापय ज्योतिं
घोषयन्ती सुसंस्कृता ।
शुभदा जालपुटे सन्ना
सङ्गमग्रामसम्भवा ॥ २॥

नववाणी नवा रम्या
सज्जनानन्ददायिका ।
पूर्णचन्द्रप्रभायुक्ता
चन्दनार्द्रसुशीतला ॥ ३॥

समस्तेषु च लोकेषु
सजीवा शान्तरूपिणी ।
अङ्गुलीस्पर्शमात्रेण
त्वागमिष्यति सेविका ॥ ४॥

यत्नेन जनिता सेयं
संगमग्रामवासिनाम् ।
संस्कृताध्यापकानां मे
सर्वेषां सहकारिणाम् ॥ ५॥

यत्रास्त्यचञ्चला बुद्धि-
रुद्यमो मेरुसन्निभः ।
जिज्ञासा च जिगीषा च
तत्र श्रीरिति निश्चिता ॥ ६॥

शतशो/ध्यापकाः लोके
पठितारश्च सहस्रशः ।
भाषाप्रणयिनश्चास्याः
संस्थायाः सेवने रताः ॥ ७॥

सङ्गमेशकटाक्षेण
साधूनां चोदनेन च ।
वाणीयमतुला भूया-
दासूर्यचन्द्रतारकम् ॥ ८॥

पालकः पोषकस्तस्याः
जोसाख्यः सज्जनो बुधः ।
नीरवं कुरुते कर्म
मन्दमारुतसन्निभः ॥ ९॥

जयतात् मङ्गले धन्ये
विमले सम्प्रयोजिके ।
निस्वार्थे निस्तुले बाले
संस्कृतचन्द्रिकास्त्रवे ॥ १०॥

– विजयन् वी पट्टाम्बी ।
इरिङ्ङालक्कुटा

*Jayatat Mangale Dhanye*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*